# A-I/1/1298/21

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रमेयकमलमार्त्तण्डग्रन्थः केन आचार्येण लिखितः?
2. पाठ्यग्रन्थस्य मङ्गलाचरणं लिखत।
3. प्रमेयकमलमार्त्तण्डग्रन्थस्य मूलग्रन्थः कः वर्तते?
4. न्यायदर्शने कति प्रमाणानि स्वीकृतानि?
5. सन्निकर्षवादः कस्य दर्शनस्य विचारः वर्तते?
6. कः संशयः?
7. जैनदर्शने कति प्रमाणानि सन्ति?
8. समारोपः कः भवति?
9. कारकसाकल्यं प्रमाणं कस्मिन् मते स्वीकृतम्?
10. 'प्रमेयः' अस्य शब्दस्य अर्थः कः?
11. 'शब्दाद्वैतवादः' कस्य दर्शनस्य मतमस्ति?

**अथवा**

प्रमेयकमलमार्त्तण्डग्रन्थस्य समयः कः अस्ति?

12. प्रमाणात् कस्य सिद्धिः भवति?

**अथवा**

प्रसिद्धार्थख्यातिवादः कस्य मतम्?

13. 'प्रमाणाभासाद्विपर्ययः' अस्य कः अर्थः?

**अथवा**

'ज्ञानं' सर्वथा परोक्षं के मन्यन्ते?

14. प्रमाणलक्षणे 'व्यवसायात्मकं' पदं किं सूचयति ?

**अथवा**

अनिर्वचनीयार्थख्यातिः का वर्तते ?

15. 'साधकतमत्वम्' किम् ?

**अथवा**

'अपूर्वार्थत्वम्' अस्य किं प्रयोजनं प्रमाणलक्षणे ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. जैनाभिमतप्रमाणं ग्रन्थदिशा विवेचयत।

17. 'दृष्टोऽपि समारोपात्तादृक्' सूत्रं स्पष्टयत।

18. सन्निकर्षस्य स्वरूपं विलिख्य तस्य जैनमतानुसारेण निरसनं कुरुत।

**अथवा**

ज्ञातृव्यापारविचारं स्पष्टीकुरुत।

19. 'तन्निश्चयात्मकं समारोपविरुद्धत्वादनुमानवत्' अस्य सूत्रस्य व्याख्या कार्या।

**अथवा**

'अनादिनिधनं शब्दब्रह्मतत्त्वं यदक्षरम्' अस्य व्याख्यां कुरुत।

20. स्मृतिप्रमोषविचारं विलिख्य निरसनं कुरुत।

**अथवा**

अपूर्वार्थत्वं स्पष्टीकुरुत।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्यप्रभाचन्द्रस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।

**अथवा**

प्रमाणप्रमाणाभाषयोः ग्रन्थदिशा स्वरूपं स्पष्टयत।

# A-I/2/1299/21

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वार्थवार्तिकग्रन्थः केन आचार्येण लिखितः?
2. सम्यग्दर्शनस्य किं लक्षणम्?
3. तत्त्वार्थवार्तिकस्य मूलग्रन्थः कः वर्तते?
4. अधिगमजसम्यग्दर्शनं कथं भवति?
5. आस्रवतत्त्वस्य किं लक्षणम्?
6. मोक्षस्य लक्षणं किम्?
7. संवरपदस्य अर्थं स्पष्टयत ग्रन्थदिशा।
8. 'सर्वार्थप्रधानत्वात्' अस्यार्थं लिखत।
9. निक्षेपाः कति सन्ति? नामानि लिखत।
10. प्रमाणस्य लक्षणं लिखत।
11. 'प्रमाणनयैरधिगमः' सूत्रस्य अर्थं लिखत।

**अथवा**

दर्शनपदस्य व्युत्पत्तिं लिखत।

12. प्रमाणं कतिविधम् अस्ति?

**अथवा**

'ततो विशुद्धतरत्वात् मनः पर्ययग्रहणम्' अर्थं लिखत।

13. नैगमनयस्य लक्षणं किम्?

**अथवा**

'बन्धनबद्धवत्' अस्य वार्तिकस्य अर्थं लिखत।

14. 'सूर्याचन्द्रमसोर्ग्रहणवत्' वार्तिकम् इदं स्पष्टयत।

**अथवा**

नयस्य किं लक्षणम्?

15. 'समवायाभावो वृत्त्यन्तराभावात्' कः अर्थः अस्य वार्तिकस्य?

**अथवा**

पदार्थानाम् अधिगमः कथं भवति?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. सप्तनयाः ग्रन्थानुसारेण लेखनीयाः।

17. 'आस्रवनिरोधः संवरः' वार्तिकं स्पष्टयत।

18. 'सर्वद्रव्यपर्यायेषु केवलस्य' सूत्रं वर्णयत।

**अथवा**

'स्वजात्य विरोधे नैकत्वोपनयात् समस्तग्रहणं संग्रहः' अस्य वार्तिकस्य अर्थं लिखत।

19. 'मध्ये  ज्ञानवचनम्, ज्ञानपूर्वकत्वाच्चारित्रस्य' अस्य वार्तिकस्य कः अर्थः?

**अथवा**

'प्रमाणनयार्पणाभेदात्' वार्तिकस्य अस्य कः अर्थः?

20. 'जीवाजीवास्रवबन्धसंवर निर्जरामोक्षास्तत्त्वम्' सूत्रं वर्णयत।

**अथवा**

प्रत्यक्षपरोक्षभेदपूर्वकं ज्ञानानि स्पष्टयत।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. तत्त्वार्थवार्तिकग्रन्थस्य वैशिष्ट्यं महत्त्वञ्च विस्तरेण वर्णयत।

**अथवा**

रत्नत्रयात्मकं मोक्षमार्गं वर्णयत ग्रन्थदिशा।

# A-I/3/1300/21

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. जिना: के भवन्ति? लिखत।
2. 'णमो जिणाणं जिदभवाणं' इत्यनेन किमुक्तम्?
3. 'समयमियं सुणह वोच्छामि' इत्यत्र समयशब्देन किं तात्पर्यम्?
4. 'णिप्पणां जेहिं तद्वलुक्कं' इत्यनेन किमुक्तम्?
5. 'पञ्चास्तिकाया:' इत्यत्र कायपदेन किं प्रयोजनम्?
6. 'दवियदि गच्छदि दवियं' इत्यत्र द्रव्यस्य किं स्वरूपं संकेतितम्?
7. द्रव्यगुणानाम् अभेदो कथं संभवति?
8. द्रव्यपर्यायाणाम् अभेदो कथं सिद्ध्यति?
9. सिद्धजीवस्य अभूतपूर्वत्वं कथं प्रोक्तम्?
10. संसारिजीवस्य किं स्वरूपं प्रोक्तम्?
11. जीवस्य दशप्राणा: के भवन्ति? लिखत।

**अथवा**

जीवा पुग्गलकाया धम्माधम्मा तहेव आयासं।

अत्थित्तम्हि णिदादा अणण्णमइया अणुमहंता॥ –इति गाथा व्याख्येया।

12. संसारीजीवस्य स्वदेहमात्रत्वे क: दृष्टान्त: प्रदत्त:?

**अथवा**

उपयोगस्य लक्षणं लिखत।

13. 'परमाणू चेव अविभागी' इत्यनेन किं प्रोक्तम्?

**अथवा**

पुद्गलशब्दस्य का व्युत्पत्ति: कृता?

14. धर्मद्रव्यस्य धर्मास्तिकायस्य वा गति हेतुत्वे को हेतुः प्रदत्तः?

**अथवा**

अर्थाः पदार्थाः वा कति प्रोक्ताः? नामानि लिखत।

15. 'देवा चउण्णिकाया' इत्यनेन किं तात्पर्यम्?

**अथवा**

अधर्मद्रव्यस्य स्थितिहेतुत्वे को दृष्टान्तः प्रदत्तः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पञ्चास्तिकायानां कालस्य द्रव्यत्वं स्पष्टयत।

17. द्रव्यस्य त्रीणि लक्षणानि विवेचयत।

18. जीवस्य स्वदेहप्रमाणत्वं स्पष्टयत।

**अथवा**

भावस्स णत्थि णासो णत्थि अभावस्स चेव उप्पादो। गुणपज्जयेसु भावा उप्पादवए पकुव्वति॥

–इति गाथा व्याख्येया।

19. कालद्रव्यस्य स्वतंत्रप्रमाणत्वं स्पष्टयत।

**अथवा**

उद्येण उवसमेण य रवयेण दुहिं मिस्सिदेहिं परिणामे। जुत्ता ते जीवगुणा बहुसु य अत्थेसु विच्छिण्णा॥

–इति गाथायाः व्याख्या विधेया।

20. आकाशद्रव्यस्य स्वरूपं स्पष्टयत।

**अथवा**

आदेशमत्तमुत्तो धादुचदुक्कस्स कारणं जो दु। सो णे ओ परमाणू परिणामगुणो सयमसद्दो॥

–इति गाथा व्याख्येया।

**स. कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं प्रदेयम्।** **(2×10=20)**

21. पञ्चास्तिकायग्रन्थस्य ग्रन्थकारस्य च महत्त्वं प्रतिपादयत।

**अथवा**

मोक्षमार्गस्य स्वरूपं निबन्धरूपेण लिखत।

22. सप्ततत्त्वानि नवपदार्थाः वा विवेचनीयाः।

**अथवा**

पञ्चास्तिकायग्रन्थस्य सारांशो लेखनीयः।

# A-I/4/1301/21

**प्रथमसत्रार्द्धम्**

**चतुर्थपत्रम्**

**जैनदर्शनम्**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तर्कशब्दस्य किं तात्पर्यम्?

2. तर्कशास्त्रस्य प्राचीननाम किम्?

**अथवा**

तर्कशास्त्रस्य मुख्यविषयः कः?

3. नयस्य लक्षणं किम्?

**अथवा**

निक्षेपस्य स्वरूपं किम्?

4. ईहाज्ञानस्य स्वरूपं किम्?

5. अर्थावग्रहस्य लक्षणं किम्?

6. परोक्षप्रमाणस्य लक्षणं किम्?

**अथवा**

स्मृतेः लक्षणं किम्?

7. व्याप्तेः लक्षणं किम्?

**अथवा**

हेतोः लक्षणं किम्?

8. दृष्टान्तस्य लक्षणं किम्?

9. प्रतिज्ञायाः लक्षणं किम्?

10. अनेकान्तस्य लक्षणं किम्?

**अथवा**

स्याद्वादस्य लक्षणं किम्?

11. साधनस्य लक्षणं लिखत।

12. पक्षस्य लक्षणं किम् ?

13. अव्याप्तेः लक्षणं लिखत।

14. संग्रहनये का व्यवस्था वर्तते ?

15. मतिज्ञानस्य लक्षणं लिखत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. जैनदर्शने सम्यग्ज्ञानस्य स्वरूपं लिखत।

17. हेतोः स्वरूपं लिखत।

18. जैनतर्कभाषायाः परिचयं लिखत।

**अथवा**

ग्रन्थकारस्य परिचयं लिखत।

19. जैनदर्शने "सप्तभंगी" इति पदं विशदयत।

**अथवा**

अनेकान्तवादस्य स्वरूपं लिखत।

20. बौद्धदर्शने प्रमाणस्वरूपं लिखत।

**अथवा**

प्रत्यक्षप्रमाणस्य लक्षणं लिखत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. परोक्षप्रमाणस्य स्वरूपं लिखत।

**अथवा**

जैनदर्शने मोक्षस्य स्वरूपं लिखत।

**अथवा**

चतुरंगन्यायव्यवस्थायाः परिचयं लिखत।